# Guru Stotram

# ગુરુસ્તોત્રમ્ ૭

## Document Information

Text title : Guru Stotram

File name : gurustotram7.itx

Category : deities_misc, bRRihannAradIyapurANa, gurudev, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : bRRihannAradIyapurANa | pUrvabhAga | adhyAya 89/4-8||

Latest update : October 22, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 22, 2024

*sanskritdocuments.org*

# ગુરુસ્તોત્રમ્ ૭

સનત્કુમાર ઉવાચ ।
અથાસામાવૃતિસ્થાનાં શક્તીનાં સમયેન ચ ।
નામ્નાં સહસ્રં વક્ષ્યામિ ગુરુધ્યાનપુરઃસરમ્ ॥ ૮૯-૧॥

નાથા નવ પ્રકાશાદ્યાઃ સુભગાન્તાઃ પ્રકીર્તિતાઃ ।
ભૂમ્યાદીનિ શિવાન્તાનિ વિદ્ધિ તત્ત્વાનિ નારદ ॥ ૮૯-૨॥

ગુરુજન્માદિપર્વાણિ દર્શાન્તાનિ ચ સપ્ત વૈ ।
એતાનિ પ્રાઙ્મનોવૃત્ત્યા ચિન્તયેત્સાધકોત્તમઃ ॥ ૮૯-૩॥

ગુરુસ્તોત્રં જપેચ્ચાપિ તદ્ગતેનાન્તરાત્મના ।
નમસ્તે નાથ ભગવઞ્શિવાય ગુરુરૂપિણે ॥ ૮૯-૪॥

વિદ્યાવતારસંસિદ્ધ્યૈ સ્વીકૃતાનેકવિગ્રહ ।
નવાય નવરૂપાય પરમાર્થૈકરૂપિણે ॥ ૮૯-૫॥

સર્વાજ્ઞાનતમોભેદભાનવે ચિદ્ઘનાય તે ।
સ્વતન્ત્રાય દયાક્લૃપ્તવિગ્રહાય શિવાત્મને ॥ ૮૯-૬॥

પરતન્ત્રાય ભક્તાનાં ભવ્યાનાં ભવ્યરૂપિણે ।
વિવેકિનાં વિવેકાય વિમર્શાય વિમર્શિનામ્ ॥ ૮૯-૭॥

પ્રકાશાનાં પ્રકાશાય જ્ઞાનિનાં જ્ઞાનરૂપિણે ।
પુરસ્તાત્પાર્શ્વયોઃ પૃષ્ઠે નમઃ કુર્યામુપર્યધઃ ॥ ૮૯-૮॥

સદા મચ્ચિત્તસદને વિધેહિ ભવદાસનમ્ ।
ઇતિ સ્તુત્વા ગુરું ભક્ત્યા પરાં દેવીં વિચિન્તયેત્ ॥ ૮૯-૯॥

ઇતિ નારદપુરાણે પૂર્વભાગે એકોનનવતિમાધ્યાયાન્તર્ગતં
ગુરુસ્તોત્રં સમાપ્તમ્ ।
(એવં ચ તન્ત્રરાજતઃ પ્રથમપટલે ૯૬-૧૦૦)

બૃહન્નારદીયપુરાણ । પૂર્વભાગ । અધ્યાય ૮૯/૪-૮॥

bRRihannAradIyapurANa . pUrvabhAga . adhyAya 89/4-8..

Proofread by PSA Easwaran

*Guru Stotram*

pdf was typeset on October 22, 2024

Please send corrections to *sanskrit@cheerful.com*